॥ धर्मे नास्ति भयं क्वचित् ॥

॥ श्रीमन्महामन्दिराखण्ड-हरिमय-विद्वद्गुरुपरम्परायै नमः ॥

जगद्गुरु-श्रीमद्-वल्लभाचार्य-विद्यालक्ष्मी-संवर्धन-सङ्कल्पः

लघुस्तोत्रसरित्सागरः

(गद्य-पद्यात्मकः)



* प्रकाशकम् *

श्रीगोवर्धनेश-प्रकाशन-मण्डलम्

(मुम्बापुरी)

आवरणपृष्ठस्थं शुद्ध-पुष्टिमार्गीय-नाथद्वारा-शैल्या समालिखितं चित्रं
गुरुचरणाज्ञानुवर्ति-श्रीनिमेष-शाह-श्रेष्ठिना प्रकाशनाय समर्पितम्।

चित्रकारः - 'नाथद्वारा'-धामस्थः 'श्रीखूबीरामजित्'।

चित्रपरिचयः।

(स्रग्धरा)

बर्हापीडाभिरामं मृगमदतिलकं कुन्तलाक्रान्तगल्लं
कञ्जाक्षं कम्बुकण्ठं प्रहसितवदनं स्वाधरे न्यस्तवेणुम् ॥
श्यामं शान्तं त्रिभङ्गं रविकरवसनं भूषितं वैजयन्त्या
वन्दे वृन्दावनस्थं युवतिशतयुतं ब्रह्मगोपालवेषम् ॥१॥

CAT NO.

॥ श्रीगोपीजनवल्लभाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

जगद्गुरु-श्रीमद्-वल्लभाचार्य-विद्यालक्ष्मी-संवर्धन-सङ्कल्पः

जगद्गुरु-श्रीमद्-वल्लभाचार्य-वंशावतंसानां
पू. पा. गो. १०८ श्रीअनिरुद्धलाल-महाराजानाम्
आज्ञया प्रकाशितः

लघुस्तोत्रसरित्सागरः

(गद्य-पद्यात्मकः)

विशेषानुग्रहः
जगद्गुरु-श्रीमद्-वल्लभाचार्य-वंशावतंसाः पण्डि
पू. पा. गो. १०८ श्रीश्याममनोहर-महार
(पार्ला-किशनगढ़)

* प्रकाशकम् *

श्रीगोवर्धनेश-प्रकाशन-मण्डल
(मुम्बापुरी)

प्रथमसंस्करणम् : श्रीवल्लभाब्दः ५२९ - वि. सं. २०६३ - 2006 A.D.

प्रति-संख्या : १०००

निःशुल्कवितरणार्थम्

सम्पादकः : गोस्वामी गोकुलनाथः (मन्दारकुमारः), बृहन्मन्दिरम्

Laghustotrasaritsāgaraḥ : a collection of hymns published on the basis of manuscripts procured from the Mota Mandir-Mumbai-India and Pandit Shri Gattulalaji Research Center-Mumbai-India

पत्रप्रेषणसङ्केतः :

Shri Govardhanesh Prakashan Mandal

Administrator : Shri Bipinbhai Shah
Shop No. 41, 1st Bhoiwada,
H. H. Shri Gokulnathji Maharaj Lane,
Mumbai - 400 002.
Ph. : (022) 2242 1456 • Telefax : (022) 2242 1492
email : vedagaana@yahoo.com

मुद्रक :

Creative Compugraphics

Nathalal Bhuvan, 3rd Floor,
133, V. P. Road, Mumbai - 4.
Ph. : (022) 2385 9603
www.geocities.com/utsava_02
email : ccg_nik@yahoo.com

अस्ति किञ्चित् वक्तव्यम्।

नत्वा श्रीवल्लभाचार्यान् शुद्धाद्वैतप्रवर्तकान्॥
बालकृष्णं सदा वन्दे वन्दे गुरुपरम्पराम्॥ १॥

सर्वोद्धारप्रयत्नात्मभिः श्रीमद्वल्लभाचार्यचरणैः तेषाम् आत्मजाभ्यां परवर्ति-आचार्यबालकैश्च बहूनि स्तोत्राणि विरचितानि। तेषु बहूनि स्तोत्राणि बृहदाकारग्रन्थरूपेण बृहत्स्तोत्रसरित्सागरे पुरा विद्वद्भिः प्रकाशितानि।

एते स्वाचार्यचरणोक्तमार्गरक्षणतत्पराः स्वीयजनानाम् अज्ञानान्धकार-प्रहाणं कर्तुं सिद्धाः आचार्यवंशजाः सदा सज्जनवेष्टिताः आसन्। ग्रन्थावगाहन-कर्तृ-गुरूणां स्वकीयाः सज्जनाः विविधासु कलासु निपुणाः प्रायशः संस्कृतज्ञाः तत्त्वजिज्ञासवः लब्धानुग्रहाः भक्ताश्च आसन्। एतेषाम् उदात्तश्रेण्यां महादेवः विष्णुदासः निर्भयरामः कृष्णदासः गोपालभट्टः कृपारामः श्रीनाथभट्टः देवेशभट्टः गोविन्दभट्टः केवलरामः भगवद्दासः नन्दलालः साँचीहर-गोपालदासः गङ्गाधरभट्टः तुलजाराम इच्छारामः महाशयः रामचन्द्रभट्टः जयगोपालभट्टः शिवः मुरलीधरः शास्त्रि-छगनलालः कन्हैयालालः प्रभुलालः वैद्यनाथ इत्यादयः अस्माभिः लघुस्तोत्रसरित्सागर इतिनाम्नः ग्रन्थस्य प्रकाशनावसरे स्मर्तव्याः।

एतेषां विदुषां बहवः ग्रन्थाः सम्प्रति लुप्तप्रायाः अप्रकाशिताश्च कुत्रचित् विद्यन्ते। पुरा अन्वेषणकार्यगौरवकारणतः अन्वेषकाः तेषां प्रकाशनं कर्तुं न शक्तवन्तः। अधुनापि कार्यमिदं न केवलमेकस्यापितु समस्त - पुष्टिमार्गीय - संस्कृताभिमानिजनानां पवित्रतमं मुख्यतमञ्च दायित्वमस्तीति मुहुर्मुहुर्ज्ञापयन् विरमाम्यहं लेखनी-व्यापारात्।

गो.गोकुलनाथः

		Manuscripts from	
Name of the text & author	Published earlier	M.M.C.*	P.G.R.C.**
1. Śrīkṛṣṇaḥ śaraṇaṁ mamāṣṭakam (Shri Raghunathaji)	✓	-	1
2. Mayūracandrikādhāraṇavicāraḥ (Shri Hariraya Mahaprabhu)	-	-	1
3. Śrīrādhikāprāṇanāthasya niśīthalīlā (Shri Hariraya Mahaprabhu)	-	-	2
4. Śrīgovarddhanāṣṭakam (Shri Dwarikeshaji)	✓	1	1
5. Śrīgovarddhanāṣṭakam (Shri Dwarikeshaji)	-	1	-
6. Gosvāmikulayaśovarṇanam (Shri Dwarikeshaji)	✓	1	-
7. Śrīgopālalālāṣṭakam (Shri Giridharaji)	✓	-	1
8. Śrīviṭṭhaleśvara-aṣṭottaraśatanāma-stotram (Shri Mahadeva)	-	1	1
9. Nāmakalpatarustavaḥ (Shri Vishnudasa)	-	1	-
10. Yamunāstotram (Shrinathabhatta)	-	-	1
11. Śrīyajñavārāhastotram (Shrinathabhatta)	-	-	1
12. Śrīchatrabandhaḥ (unknown)	- (Private Collection)		
13. Śrīkamalabandhaḥ (unknown)	- (Private Collection)		

* M.M.C. - Mota Mandir Collection (Mumbai)

** P.G.R.C. - Pandit Shri Gattulalaji Research Center. (Mumbai)

अनुक्रमणिका

१. श्रीकृष्णः शरणं ममाष्टकम् ..... १ - २

२. मयूरचन्द्रिकाधारणविचारः २

३. श्रीराधिकाप्राणनाथस्य निशीथलीला ३

४. श्रीगोवर्द्धनाष्टकम् ..... ४ - ५

५. श्रीगोवर्द्धनाष्टकम् ..... ६ - ७

६. गोस्वामिकुलयशोवर्णनम् ..... ८ - १५

७. श्रीगोपाललालाष्टकम् ..... १६ - १७

८. श्रीविट्ठलेश्वर-अष्टोत्तरशतनाम-स्तोत्रम् ..... १८ - २०

९. नामकल्पतरुस्तवः ..... २१ - २३

१०. यमुनास्तोत्रम् ..... २४ - २५

११. श्रीयज्ञवाराहस्तोत्रम् ..... २६ - २७

१२. श्रीछत्रबन्धः २८

१३. श्रीकमलबन्धः २९

॥ श्रीकृष्णः शरणं ममाष्टकम् ॥

(अनुष्टुप्)

दलीकृतदशास्यश्च पन्नगीकृतपन्नगः ॥
कृशीकृतकृशानुश्च श्रीकृष्णः शरणं मम ॥ १ ॥

श्रीफलीकृतफलार्थीयस्तुच्छीकृतकौरवः ॥
निर्वैरीकृतवातारिः श्रीकृष्णः शरणं मम ॥ २ ॥

कृतार्थीकृतकुन्तीजः प्राकृतीकृतपूतनः ॥
कलङ्कीकृतकंसादिः श्रीकृष्णः शरणं मम ॥ ३ ॥

सुखीकृतश्रीदामा च शङ्करीकृतशङ्करः ॥
सितीकृतसरिन्नाथः श्रीकृष्णः शरणं मम ॥ ४ ॥

छलीकृतबलिः सद्यो निधनीकृतधेनुकः ॥
कन्दर्पीकृतकुब्जादिः श्रीकृष्णः शरणं मम ॥ ५ ॥

महेन्द्रीकृतमाहेयः शिथिलीकृतमैथिलः ॥
आनन्दीकृतनन्दार्यः श्रीकृष्णः शरणं मम ॥ ६ ॥

वराकीकृतराकेशः विपक्षीकृतराक्षसः ॥
सन्तोषीकृतसद्भक्तः श्रीकृष्णः शरणं मम ॥ ७ ॥

ज्वरीकृतजरासन्धः कमलीकृतकार्मुकः ॥
प्रभ्रष्टीकृतभीष्मादिः श्रीकृष्णः शरणं मम ॥ ८ ॥

(शार्दूलविक्रीडितम्)

श्रीकृष्णः शरणं ममाष्टकमिदं प्रोत्थाय यः सम्पठेत्
सोऽयं गोकुलनायकस्य पदवीं संयाति भूमितले ॥
पश्यत्येव निरन्तरं तरणिजातीरस्थकेलिं प्रभोः
सम्प्राप्नोति तदीयतां प्रतिदिनं गोपीशजैरावृताम् ॥ ९ ॥

॥ इति श्रीदेवकीनन्दनात्मज-श्रीरघुनाथकृतं श्रीकृष्णः शरणं ममाष्टकं सम्पूर्णम् ॥

(अधोलिखितपद्यं लिपिकारेण निजहस्ताक्षरैः श्रीकृष्णः शरणं ममाष्टकस्यान्ते लिखितं प्राप्यते ।)

(स्रग्धरा)

बर्हापीडाभिरामं मृगमदतिलकं कुन्तलाक्रान्तगल्लं
कञ्जाक्षं कम्बुकण्ठं प्रहसितवदनं स्वाधरे न्यस्तवेणुम् ॥
श्यामं शान्तं त्रिभङ्गं रविकरवसनं भूषितं वैजयन्त्या
वन्दे वृन्दावनस्थं युवतिशतयुतं ब्रह्मगोपालवेषम् ॥ १ ॥

॥ श्रीकृष्णाय नमः ॥

॥ मयूरचन्द्रिकाधारणविचारः ॥

नृत्यन्मयूरानुकरणमित्यत्र । यथा मयूर उद्बुद्धे रसे नृत्यति तदा स्वपक्षान् मुकुटवद्धारयति तेन मयूराणां नृत्यं कादाचित्कम् । भगवांस्तु सर्वदैव मयूरपक्षान् धारयति तेन सर्वदोद्बुद्धरसात्मको भगवांस्तिष्ठति अपरञ्च । यथा मयूरस्य अलौकिकरीत्या रमणं तथा भगवतोऽपि स्वामिनीभिः सह रमणं नेत्रद्वारैव सर्वासां सर्वे मनोरथाः सिध्यन्तीति तेनैव सर्वपुरुषार्थसिद्धिरिति भावः न लोकवद्विषयभोग इत्यर्थः ।

॥ इति श्रीहरिदासविरचितमयूरचन्द्रिकाधारणविचारः ॥

॥ श्रीराधिकाप्राणनाथस्य निशीथलीला ॥

निशीथे संस्मरेत्कृष्णं राधिकाभुजयन्त्रितम् ॥
वृन्दावनकुटीरस्थं दिव्यमाल्यैरलङ्कृतम् ॥१॥

निशीथे पुष्पतल्पस्थं दम्पत्यथ रसाधिकौ ॥
सुगन्धशीतलं मन्दं वहन्तं सुखमारुतम् ॥२॥

दिव्यगन्धानुलिप्ताङ्गं दिव्याङ्गमणिभूषिताम् ॥
नीलवाससि सुप्रीतां किशोरीं कनकप्रभाम् ॥३॥

इन्दुगौरकरस्पर्शा कालिन्दीपुलिनान्तके ॥
नानाकेलिरतं प्रेष्ठं निशीथे संस्मरेत्सदा ॥४॥

निशीथे दर्शनं दृष्ट्वा मुदिता ललितादिका ॥
प्राणनाथप्रियासङ्गे पुष्पतल्पे निवेशिता ॥५॥

निशीथे कमलामोदकालिन्दीपुलिने वने ॥
जाम्बूनदनिभा श्यामा इन्द्रनीलनिभं प्रियम् ॥६॥

निशीथे सुन्दरीयूथरासमण्डलशोभितम् ॥
यमुनापुलिने रम्ये क्रीडासक्तो व्रजेश्वरः ॥७॥

निशीथे मोहनं रूपं मोहनीगणवेष्टितम् ॥
मोहनं मोहनालापैर्मोहनं मोहनीमुखम् ॥८॥

एषा निशीथलीला च दासीनां हितकारिणी ॥
श्रीमद्राधापदाम्भोजप्रापकं चिन्त्यतां सदा ॥९॥

साक्षाच्छ्रीगोकुलेशस्य श्रीमद्वल्लभनन्दनः ॥
परागपद्मसेवायां प्राप्यते नान्यथा इदम् ॥१०॥

॥ इति श्रीराधिकाप्राणनाथस्य निशीथलीला सम्पूर्णा ॥

(श्रीहरिरायमहाप्रभु-विरचिता)

॥ श्रीकृष्णाय नमः ॥
॥ श्रीगोपीजनवल्लभाय नमः ॥
॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

॥ श्रीगोवर्द्धनाष्टकम् ॥

(शार्दूलविक्रीडितम्)

श्रीमद्वल्लभदीक्षितं व्रजवधूभावेन सम्पूरितं
श्रीमद्विट्ठलदीक्षितं गिरिधरं दामोदरं तत्सुतम् ॥
श्रीमद्विट्ठलरायमच्युततनुं पुत्रैश्चतुर्भिर्वृतं
नामं नाममहं करोमि सरसं गोवर्द्धनस्याष्टकम् ॥१॥

शोणश्यामपिशङ्गगौरशबलैर्नानादृषच्छोभितं
नानागुल्मलताङ्कितैः कुसुमितैर्नानाफलैः शाखिभिः ॥
नानाकुञ्जकदम्बखण्डनिकरैर्नानानिकुञ्जैर्वृतं
श्रीगोवर्द्धनमद्रिराजमनिशं संसेवयामो वयम् ॥२॥

नानाघोषनितम्बिनीगणशतैर्नानाविभूषाम्बरैः
नानाभक्तमनोज्ञगाननिपुणैः नानासुमैर्भूषितैः ॥
नानानृत्यकलाविभेदरसिकैः प्रीतैः सदा संवृतं
श्रीगोवर्द्धनमद्रिराजमनिशं संसेवयामो वयम् ॥३॥

नानागोपगणैरलं प्रमुदितैः गोचारणे तत्परैः
नानाकल्पविभूषितैर्मुरलिकानादेन सम्मोहितैः ॥
नानाक्रीडनसाधनैर्हरिगुणैः सञ्जातभावप्लुतैर्-
युक्तं श्रीगिरिराजमद्भुततमं संसेवयामो वयम् ॥४॥

नानामत्तमयूरनृत्यरुचिरं जुष्टं मयूरीगणैः
कूजत्कोकिलसारसं मधुकरैः सङ्गीयमानं तराम् ॥
दात्यूहैः शुकसारिकाकलरवैर्हंसैश्चकोरैर्बकैः
श्रीगोवर्द्धनमद्रिपूजितपदं संसेवयामो वयम् ॥५॥

सिक्तं मानसगङ्गया विमलया श्रीब्रह्मकुण्डेन च
राधाकृष्णसुपुष्पगोपसुरभीगोविन्दगन्धर्वकैः ॥
कुण्डेनाप्सरसां हरेः पशुपतेर्दन्तावलस्यापि च
श्रीगोवर्द्धनमद्रिनायकमणिं संसेवयामो वयम् ॥६॥

श्लिष्टैर्हेमलताभिरद्भुततमैः श्यामैस्तमालैर्धवैर्-
नीपैरिन्द्रयवैः पलाशवरुणैर्न्यग्रोधबोधिद्रुमैः ॥
निम्बैर्गुग्गुलुगोक्षुरैस्तुलसिकाहिंस्रादिभिश्छादितं
श्रीगोवर्द्धनमद्रिनाथमतुलं संसेवयामो वयम् ॥७॥

श्रीकृष्णेन करेऽङ्गुलीषु च धृतं वंशीस्वरै रोपितं
गोपैर्यष्टिभिराभृतं व्रजजनैर्गोगोपगोपीगणैः ॥
शक्रस्याखिलगर्वभेदनपरं नन्दादिभिस्संस्तुतं
श्रीगोवर्द्धनमद्रिपं ह्यविरतं संसेवयामो वयम् ॥ ८॥

श्रीगोवर्द्धननाथसद्मविलसत्सप्तध्वजैर्मण्डितं
श्रीगोवर्द्धननाथहस्तचरणाद्यव्यक्तचिह्नाङ्कितम् ॥
श्रीगोवर्द्धननाथहस्तलिखितैर्दिव्याक्षरैरङ्कितं
श्रीगोवर्द्धनमद्रिराजमनिशं संसेवयामो वयम् ॥ ९॥

यो नित्यं प्रपठेदिदं नियमतो गोवर्द्धनस्याष्टकं
तस्य श्रीगिरिराजपर्वतधरस्तुष्येत्सदाऽसंशयः ॥
श्रीमद्वल्लभविट्ठलेशगिरिभृत्पादारविन्दाश्रयात्
श्रीगोवर्द्धनसन्निधौ निवसतिर्नित्यं भवेत्सौख्यतः ॥१०॥

॥ इति श्रीमद्वल्लभाचार्यवंशोत्पन्नश्रीमथुरानाथसूरिसूनुद्वारिकेश्वरविरचितं
श्रीगोवर्द्धनाष्टकं समाप्तम् ॥

॥ श्रीहरिः ॥

॥ श्रीकृष्णाय नमः ॥

॥ श्रीगोवर्द्धनाष्टकम् ॥

(उपजातिः)

श्रीकृष्णहस्ते स्थितमद्भुतद्युतिं
नृत्यन्मयूरैः परिशोभमानम् ॥
नमाम्यहं कायमनोवचोभिः
गोवर्द्धनं श्रीहरिदासवर्यम् ॥ १ ॥

श्रीकृष्णहस्तोपरि नृत्यमानं
धवैः पलाशैरधिशोभमानम् ॥
नमाम्यहं कायमनोवचोभिः
गोवर्द्धनं श्रीहरिदासवर्यम् ॥ २ ॥

श्रीकृष्णहस्ते मुरलीस्वरैः स्थितं
श्यामैस्तमालैरुपशोभमानम् ॥
नमाम्यहं कायमनोवचोभिः
गोवर्द्धनं श्रीहरिदासवर्यम् ॥ ३ ॥

श्रीकृष्णगेहैरतिसुन्दरद्युभिः
पतत्पताकैरुपशोभमानम् ॥
नमाम्यहं कायमनोवचोभिः
गोवर्द्धनं श्रीहरिदासवर्यम् ॥ ४ ॥

श्रीकृष्णगोभिर्महिषीभिरन्वितं
सुखं चरन्तीभिरजाभिरङ्कितम् ॥
नमाम्यहं कायमनोवचोभिः
गोवर्द्धनं श्रीहरिदासवर्यम् ॥ ५ ॥

श्रीकृष्णसङ्कर्षणगोपमालै -
रधिकृतं सानुदरीशिलासु ॥
नमाम्यहं कायमनोवचोभिः
गोवर्द्धनं श्रीहरिदासवर्यम् ॥ ६ ॥

श्रीकृष्णदेवं परिसेवमानं
पानीयघासैः फलकन्दमूलैः ॥
नमाम्यहं कायमनोवचोभिः
गोवर्द्धनं श्रीहरिदासवर्यम् ॥ ७॥

श्रीवल्लभाधीशनिवेशनस्थलैः
सरित्सरोभिः परिषिच्यमानम् ॥
नमाम्यहं कायमनोवचोभिः
गोवर्द्धनं श्रीहरिदासवर्यम् ॥ ८॥

॥ इति श्रीमद्वल्लभाचार्यवंशोत्पन्नमथुरानाथसूनु-
श्रीद्वारिकेश्वर-विरचितं श्रीगोवर्द्धनाष्टकं सम्पूर्णम्॥

॥ श्रीकृष्णाय नमः ॥
॥ श्रीगोवर्द्धनोद्धरणधीराय नमः ॥
॥ श्रीनवनीतप्रियो जयति ॥
॥ श्रीत्रिभङ्गीरायो जयति ॥

॥ गोस्वामिकुलयशोवर्णनम् ॥

(शिखरिणी)

भजे नन्दानन्दं ललितवदनं चारुनयनं
स्थितं वृन्दारण्ये निजजनजने चाटुवचनम् ॥
यशोदायाः पुत्रं सुभुजवलयं प्रीतिसदनं
सदा नृत्यानन्दं शिखरिवरगोवर्द्धनधरम् ॥१॥

यशोदोत्सङ्गस्थं वलितगमनं रूपनिकरं
कटौ बद्धं काञ्च्या स्वजनकृतरक्षं निजपतिम् ॥
भजे भाग्यं भूमेः सुपदकरयुग्मं सुवदनं
सदा सर्वैः सेव्यं ललितनवनीतप्रियमहम् ॥२॥

चतुर्बाहुं प्रष्ठं मधुरमथुरेशं नटवरं
समं स्वस्वामिन्या निजकटिकरं विट्ठलवरम् ॥
पतिं द्वारावत्याः स्वजनसहितं गोकुलपतिं
समं श्रीभ्यां नित्यं सुमुखवपुषं गोकुलविधुम् ॥३॥

भजे श्रीभ्यां साकं रतिमदनमोहं सुनयनं
स्थितं स्वीयैः साकं स्वजनमनसो मोहहरणम् ॥
निकुञ्जे क्रीडन्तं सुभगनिजगोपैरहरहर्-
भजे बालं कृष्णं प्रणतजनवृन्दे विरमितम् ॥४॥

(अनुष्टुप्)

नत्वा श्रीवल्लभाचार्यान्विट्ठलेशांश्च सद्गुरून् ॥
गोवर्द्धनं च यमुनां व्रजं वृन्दावनं प्रियम् ॥५॥
वर्णये वल्लभाधीशवंशीयान् गुणरूपतः ॥
समागतान् सप्तरूपसङ्गमे सुमहोत्सवे ॥६॥

पूर्वं स्थितांश्च सेवार्थं नाम्ना चाचरणेन च ।।
क्रमतः प्रक्रियातश्च तत्कृपातो यथामति ।।७।।

तत्र पूर्वं ये महान्तः सेवन्ते स्वप्रभुं हरिम् ।।
तान्वर्णये स्वरूपं श्रीनवनीतप्रियेश्वरम् ।।८।।

श्रीदामोदरनामानं गिरिधार्यात्मजं प्रियम् ।।
अचिन्त्यकार्यकर्तारं जगदुद्धारकारणम् ।।९।।

सेवमानं शैलधरे नवनीतप्रियं निजम् ।।
गोकुलेशं स्वामिनीभ्यां समं सर्वेश्वरेश्वरम् ।।१०।।

तत्सेवकं द्वारकेशं तत्कृपाबलतः स्थितम् ।।
सूक्ष्मबुद्धिं सूक्ष्मतनुं श्रीभागवतपाठिनम् ।।११।।

तत्पुत्रं गोकुलालङ्कारं नाम्ना बालकप्रियम् ।।
वयसा पञ्चवर्षेण मथुरानाथपौत्रकम् ।।१२।।

द्वितीयं गोपिकालङ्कारं नाम्ना ह्यतिबालकम् ।।
क्रीडन्तं बालकैः साकं द्विवर्षं सूक्ष्मरूपिणम् ।।१३।।

द्वितीयं मथुरानाथात्मजं गिरिधरं वरम् ।।
स्थूलरूपं स्थूलबुद्धिं मुग्धमन्तर्विचक्षणम् ।।१४।।

तत्सुतं गोकुलाधीशं चतुर्वर्षसुरूपिणम् ।।
क्रीडापरं स्वैर्वयस्यैः शोभनैर्बालकैर्वृतम् ।।१५।।

तृतीयं मथुरानाथसुतं श्रीविट्ठलेश्वरम् ।।
महद्बुद्धिं स्थूलतनुं विद्यावन्तं विचक्षणम् ।।१६।।

चतुर्थं मथुरानाथसूनुं बालं महामतिम् ।।
नाम्ना श्रीव्रजरत्नाख्यं प्रियं द्वादशवार्षिकम् ।।१७।।

ततो बृहद्द्वारकेशात्मजं दामोदरं प्रियम् ।।
वृद्धं महामतिं कार्ये मुदा गोकुलवासिनम् ।।१८।।

तत्सुतं पूर्वजं बालकृष्णसेवारसे रतम् ।।
नाम्ना विट्ठलरायाख्यं शृङ्गारेऽतिविचक्षणम् ।।१९।।

तदात्मजं सूक्ष्मतनुं नाम्ना श्रीव्रजजीवनम् ।।
बालकृष्णं सेवमानं पितामहमते स्थितम् ।।२०।।

तत्सुतं चापरं बालं नाम्ना लालमणिं प्रियम् ।।
कुर्वन्तं बालकृष्णस्य सपर्यां बाललीलया ।।२१।।

द्वितीयं दामोदरस्यार्भकं श्रीगोकुलोत्सवम् ।।
गुप्ताशयं गुप्तकार्यं ज्योतिःशास्त्रज्ञमेकलम् ।।२२।।

तृतीयदामोदरस्यार्भं प्रगल्भं वचनेन तु ।।
नाम्ना व्रजस्य रमणं सुरूपं शीघ्रभोजिनम् ।।२३।।

अथ श्रीद्वारकानाथात्मजश्रीलक्ष्मणं प्रियम् ।।
गुप्तहार्दं स्थूलतनुं मथुराधीशसेवकम् ।।२४।।

द्वितीयं द्वारिकानाथसुतं श्रीमुरलीधरम् ।।
महानुभावमाचार्यग्रन्थवक्तारमुत्तमम् ।।२५।।

तृतीयं रामकृष्णाख्यं सुरूपं कृष्णसेवने ।।
सावधानं सदा नासाभूषणे चतुरं प्रियम् ।।२६।।

गोवर्द्धनात्मजं स्थूलं नाम्ना तु रणछोडकम् ।।
सेवमानं मरूद्देशे श्रीमन्मदनमोहनम् ।।२७।।

तत्सुतं बालकं वर्षत्रयजातं सुरूपिणम् ।।
श्रीगोविन्द इति ख्यातं निजवंशगुणोदयम् ।।२८।।

गोपीनाथात्मजं नाम्ना व्रजजीवनमुत्तमम् ।।
सङ्गीतशास्त्रकुशलं सर्वलोकमनोहरम् ।।२९।।

अथो विट्ठलनाथस्यात्मजं श्रीगिरिधारणम् ।।
बालकृष्णं सेवमानं श्यामं मुग्धं गुहाशयम् ।।३०।।

मथुरानाथसूरेरात्मजं गोवर्द्धनं प्रियम् ।।
वाचालं व्यवहारज्ञं श्रेष्ठिलक्ष्मीप्रियं नरम् ।।३१।।

तत्सुतं श्रीविट्ठलेशं सुरूपं शास्त्रलेशगम् ।।
तथैव व्यवहारज्ञं बालकृष्णस्य सेवकम् ।।३२।।

अथ श्रीमथुराधीशसेवकान्विवृणोम्यहम् ।।
समागतानन्नकूटे सप्तरूपसमागमे ।।३३।।
श्रीमद्विट्ठलरायस्यात्मजं श्रीवल्लभं वरम् ।।
प्रभूपनामकं दीर्घं सुरूपं सुगुणान्वितम् ।।३४।।
श्रीगोपालं स्थूलतनुं घनश्यामात्मजं प्रियम् ।।
सेवन्तं मथुराधीशं मुग्धं वेदज्ञमुत्तमम् ।।३५।।
पुत्रं श्रीरघुनाथस्य व्रजभूषणमुत्तमम् ।।
सेवमानं नटवरं कृष्णसेवाविचक्षणम् ।।३६।।
श्रीवल्लभं श्यामतनुं वेदविद्याविशारदम् ।।
सुतं विट्ठलनाथस्य सर्वलोकेषु सूरिणः ।।३७।।
तत्सुतं बालकं नाम्ना श्यामलाल इति श्रुतम् ।।
क्रीडन्तं बालकैः साकं लालगोपालसेविनम् ।।३८।।
श्रीमद्विट्ठलरायाख्यं श्रीदामोदरजं प्रियम् ।।
सुबोधिनीप्रवक्तारं सर्वशास्त्रार्थपारगम् ।।३९।।
गोपीनाथं महाप्राज्ञं किञ्चिच्छास्त्रार्थपारगम् ।।
सुतं विट्ठलरायस्य पूर्वं भूतस्य सूरिणः ।।४०।।
जगन्नाथात्मजं श्रीमद्रणछोडं महामतिम् ।।
सभायां स्पष्टवक्तारं प्रगल्भं सेवने रतम् ।।४१।।
तत्सुतं सुमुखं प्रेष्ठं श्रीकृष्णं कृष्णसेवने ।।
रतं समुद्रतीरस्थं द्वारकानाथसेवकम् ।।४२।।
गोवर्द्धनेशं श्रीकृष्णसेवारसभरे स्थितम् ।।
वसन्तं सर्वकुञ्जेषु श्रीमन्मदनमोहनम् ।।४३।।
श्रीगोपालं विट्ठलेशात्मजं श्रीकृष्णसेवने ।।
रतं सर्वनिकुञ्जेषु बाबूरायोपनामकम् ।।४४।।
तदात्मजं सप्तवर्षं व्रजनाथं प्रियात्प्रियम् ।।
क्रीडन्तं बालकैः सार्द्धं श्रीमन्तं ग्रन्थपाठकम् ।।४५।।

व्रजवल्लभनाम्नो हि सुतं श्रीव्रजमोहनम् ।।
अतिबालं गुप्तगुणं गुप्तवाचं गुणाकरम् ।।४६।।

श्रीगोपालात्मजं श्रीमाधवरायं कृशं तनौ ।।
परिभ्रमन्तं सेवार्थं सेवाभावविशारदम् ।।४७।।

व्रजालङ्कारतनुजं जगन्नाथं गवां पतिम् ।।
लोकवेदाद्बहिःकृष्णसेव्यनन्याश्रमे स्थितम् ।।४८।।

तदात्मजं कृशतनुं नाम्ना गोवर्धनं प्रियम् ।।
कृष्णसेवारसभरे क्रीडन्तं निजबालकैः ।।४९।।

विट्ठलेशात्मजं श्रीमद्व्रजाधीशगुणोत्तमम् ।।
सङ्गीतशास्त्रकुशलं सेवाभावविचक्षणम् ।।५०।।

तद्भ्रातरं व्रजपतिं चित्रसङ्गीतभावगम् ।।
कृष्णावतारं सम्भूतलीलाभावप्रदर्शकम् ।।५१।।

नमाम्येतानहं भक्त्या श्रीमदाचार्यवंशजान् ।।
महात्मनो महाभाग्यान् स्वरूपद्वयसेवकान् ।।५२।।

अथ श्रीमद्विट्ठलेशरायस्य निजसेवकान् ।।
वर्णये वल्लभाधीशवंशजान् कति बालकान् ।।५३।।

श्रीगोपेश्वरनामासौ सर्वशास्त्रार्थपारगः ।।
सुबोधिनीतत्त्ववक्ता भाष्यरश्मिप्रदर्शकः ।।५४।।

तत्सुतः कृष्णरायाख्यः सुवपुर्वंशवृद्धिकृत् ।।
आस्ते श्रीमद्विट्ठलेशरायस्य कृतसेवनः ।।५५।।

तदात्मजः सूक्ष्मवपुर्बालो बुद्धिविशारदः ।।
नाम्ना गोविन्दरायोऽसावास्ते गोपेशपौत्रकः ।।५६।।

तद्भ्राता चापरो नाम्ना श्रीमद्विट्ठलरायजित् ।।
गोकुलोत्सवसूरेः सः प्रपौत्रो भुवि विश्रुतः ।।५७।।

नरसिंहात्मजः सौम्यो नाम्ना कल्याणरायजित् ।।
कृष्णसेवारसे मग्नोऽतिमुग्ध इव दृश्यते ।।५८।।

बालकृष्णात्मजो नाम्ना स्वयं गोकुलनाथजित् ।।
आदर्शरसिको नित्यं गृहे रत्नविमर्शकः ।।५९।।

तद्भ्राता व्रजपालस्तु धनुरिष्वसिचर्मभृत् ।।
चित्रवेषधरो नित्यमास्त आयुधचिह्नधृत् ।।६०।।

यादुनाथिर्घनश्यामो महाभाग्योऽसिचर्मधाः ।।
आस्तेऽयं सततं गुप्ताशय उद्विग्नमानसः ।।६१।।

तदात्मजो दृढतनुर्नाम्ना वल्लभजित्स्वयम् ।।
आस्तेऽसिचर्मधृन्नित्यं चित्रवेषोऽतिशूरवत् ।।६२।।

तदात्मजो वर्षजातो नाम्ना श्रीयदुनाथजित् ।।
गुप्ताशयो गुप्तगुणो यदुनाथप्रपौत्रकः ।।६३।।

घनश्यामात्मजो यो वै द्वितीयो गुप्तरूपभृत् ।।
आस्ते लक्ष्मणनामा स मौनव्रतपरायणः ।।६४।।

द्वितीयो यदुनाथस्य दानीराय इति श्रुतः ।।
अश्वारूढश्चित्रवेषी धनुरिष्वसिचर्मधाः ।।६५।।

बृहद्घनश्यामसुतो नाम्ना श्रीपुरुषोत्तमः ।।
आस्ते सुशीलः सौम्यात्मा सुबोधिन्यादिवाचकः ।।६६।।

श्रीगोपालस्य तु यः पुत्रो मथुरानाथसंज्ञकः ।।
बहुकालं विदेशेषु वसते सविकल्पितः ।।६७।।

एते सर्वे विशेषेण सेवन्ते विट्ठलेश्वरम् ।।
चतुर्दशमहाभाग्यास्तत्कृपाबलभागिनः ।।६८।।

अथ श्रीद्वारिकाधीशसेवकान्वर्णये विभून् ।।
महात्मनो महाभाग्यान्वीर्यवत्त्वातिविश्रुतान् ।।६९।।

श्रीमद्गोकुलनाथस्यात्मजः श्रीपुरुषोत्तमः ।।
अन्यवृत्तिं परित्यक्त्वा सेवते द्वारकेश्वरम् ।।७०।।

श्रीगोपालात्मजः श्रीमद्वल्लभः शास्त्रसारवित् ।।
कृष्णसेवारसे मग्नो मथुरानाथसेवनः ।।७१ ।।

द्वितीयो गोपालसुतो नाम्ना श्रीव्रजवल्लभः ।।
महाशयः सुवरदः सेवते द्वारिकेश्वरम् ।।७२ ।।

तृतीयो गोपालसूनुश्चित्रकार्ये विचक्षणः ।।
व्रजपालोऽतिसद्बुद्धिः सेवते द्वारिकाधिपम् ।।७३ ।।

श्रीवल्लभसुतः श्रीमद्द्वारकेशः स्वयं प्रभुः ।।
कुरुते द्वारकाधीशसेवनं सद्गुणोदयः ।।७४ ।।

एते श्रीद्वारकाधीशं रसे मग्नाश्चतुर्भुजम् ।।
बालकाः पञ्च सेवन्ते सेवाभावविचक्षणाः ।।७५ ।।

अथ श्रीगोकुलेशं तु स्वामिनीद्वयसंयुतम् ।।
सेवते सततं श्रीमान् स्वयं दामोदरः प्रभुः ।।७६ ।।

अथ श्रीगोकुलविधुं कोमलं द्विभुजं प्रभुम् ।।
सेवते सततं साक्षाच्छ्रीदामोदररूपधृक् ।।७७ ।।

अथ श्रीयदुनाथस्य वंशीयान् ज्ञानरूपिणः ।।
वर्णये रसिकान् श्रीमद्बालकृष्णकृपायुतान् ।।७८ ।।

श्रीप्रद्युम्नात्मजः श्रीमान्यदुनाथो महामतिः ।।
श्रीमत्कल्याणरायं स सेवते सततं प्रभुः ।।७९ ।।

श्रीमान् कल्याणरायोऽसौ गीतसङ्गीतसागरः ।।
महाबुद्धिर्महाकायो बलभद्रं निषेवते ।।८० ।।

तद्भ्राता व्रजपालश्च श्रीमन्मदनमोहनम् ।।
सेवते निजमार्गज्ञः सङ्गीतकुशलो महान् ।।८१ ।।

श्रीमद्गोवर्द्धनधर-शृङ्गारेऽति-विचक्षणः ।।
श्रीगोपालिर्गिरिधरो स्वास्ते शास्त्रार्थसारवित् ।।८२ ।।

एते चत्वारोऽन्नकूटे सप्तरूपसमागमे ।।
समागता वर्णितास्ते तत्कृपातो यथामति ।।८३ ।।

अथ श्रीभ्यां समं नित्यं भजे मन्मथमोहनम् ।।
सेवन्तं स्वीयभावेन श्रीमद्दामोदराभिधम् ।।८४।।

अथ षड्बालकान् शिष्टान्विदेशे प्रस्थितानहम् ।।
गणये क्रमतस्तत्र सर्वकामप्रपूरकान् ।।८५।।

द्वौ नागतौ सदा श्रीनवनीतप्रियसेविनौ ।।
माहात्म्यगोपनार्थाय गोपीनाथत्रिविक्रमौ ।।८६।।

तथा श्रीमथुराधीशसेवको व्रजवल्लभः ।।
तथा श्रीमद्बालकृष्णसेवनो व्रजरत्नजित् ।।८७।।

पुरुषोत्तमनामा च नागतौ प्रभुणा सह ।।
व्रजपालसुतो नाम्ना श्रीमद्विट्ठलनाथजित् ।।८८।।

मथुरायां स्थितः श्रीमद्वलभद्रनिषेवणे ।।
एवमेते महात्मानो वर्णिता मे यथामति ।।८९।।

श्रीमद्वल्लभवंशीयाः सङ्ख्यैकोनसप्ततिः ।।
तत्कृपाबलयुक्तेन श्रीमद्दामोदराज्ञया ।।९०।।

।। इति श्रीमथुरानाथात्मजद्वारिकेशविरचितं गोस्वामिकुलयशोवर्णनं समाप्तम् ।।



|| श्रीगोपाललालाष्टकम् ||

श्रीमदाचार्यचरणौ साष्टाङ्गं प्रणिपत्य तौ ||
विरच्यतेऽष्टकमिदं श्रीमद्गोपालपुष्टिदम् || १ ||

(उपजातिः)

यस्यानुकम्पा-वशतः सुदुर्लभं
मानुष्यमाप्तं परमस्य पुंसः ||
सर्वार्थदं दीनदयालुमेकं
गोपाललालं शरणं प्रपद्ये || २ ||

(इन्द्रवज्रा)

योऽदात्स्वसेवौपयिकं शरीरं
साङ्गं समर्थं शुभमर्थदं च ||
सेवानभिज्ञः परमस्य तस्य
गोपाललालं शरणं प्रपद्ये || ३ ||

निजाङ्ग - सन्दर्शन - योग्यताढ्यं
योऽदाद्दृशं मे परमो दयालुः ||
तदङ्ग - सौन्दर्य - रसानभिज्ञो
गोपाललालं शरणं प्रपद्ये || ४ ||

श्रीमत्कथा - संश्रवणोपयोगि
श्रोत्रं ददौ यः करुणारसाब्धिः ||
कथामृतास्वादन - मूढचेता
गोपाललालं शरणं प्रपद्ये || ५ ||

(उपजातिः)

वाचं ददौ श्रीगुणगानयोग्यां
व्रजाङ्गनाङ्गाभरणाङ्गमूर्तिः ||

तथापि नाम्नामनुकीर्तनेऽलसो
गोपाललालं शरणं प्रपद्ये ॥ ६ ॥

(इन्द्रवज्रा)

घ्राणेन्द्रियं मे तुलसीविमिश्र-
पादाब्जसद्गन्धपरागयोग्यम् ॥
ददौ कृपालुर्ह्यपराधिने यो
गोपाललालं शरणं प्रपद्ये ॥ ७ ॥

शिरश्च पादाम्बुजसत्प्रणाम-
योग्यं ददौ यो यदुवंशचन्द्रः ॥
स्तुत्या च नत्या विनयेन हीनो
गोपाललालं शरणं प्रपद्ये ॥ ८ ॥

जनोऽपराधानसकृद्विकुर्वन्
श्रान्तो भवेद्यस्तु मनाक् क्षमायाम् ॥
न चालसस्तं करुणैकबन्धुं
गोपाललालं शरणं प्रपद्ये ॥ ९ ॥

॥ इति श्रीमद्गोपालप्रभुचरणैकतानश्रीमद्गोस्वामिश्रीगोपालात्मजश्रीगिरिधरविरचितं श्रीमद्गोपाललालाष्टकम् समाप्तम् ॥

॥ श्रीविट्ठलेश्वर-अष्टोत्तरशतनाम-स्तोत्रम् ॥

(शार्दूलविक्रीडितम्)

श्रीमद्वल्लभसत्सुधाजलनिधिप्रोद्भूतमत्यद्भुतं
भूमिभूषणमक्षयं नवघनश्यामं कलङ्कीतरम् ॥
व्यभ्राहस्कररञ्जितद्युतिधरं नक्तंदिवाह्लादकं
नामं नाममहं नमामि शशिनं श्रीविट्ठलेशाभिधम् ॥ १ ॥

(अनुष्टुप्)

श्रीविट्ठलेश्वरस्याहं नाम्नामष्टोत्तरं शतम् ॥
वक्ष्ये श्रीराधिकाकान्ताधरपीयूषपीतये ॥ २ ॥
सर्वोद्धारप्रयत्नात्मा[१] श्रीमद्वल्लभनन्दनः[२] ॥
महालक्ष्मीतनूजात्मा[३] रुक्मिणीप्राणवल्लभः[४] ॥ ३ ॥
पद्मावतीप्रियतमो[५] गोपीनाथसहोदरः[६] ॥
विट्ठलेश्वरसन्नामकृतार्थीकृतसज्जनः[७] ॥ ४ ॥
श्रीकृष्णास्यापरं रूपं[८] सच्चिदानन्दविग्रहः[९] ॥
कृपादृष्टिसुधाप्राप्तिमुदिताखिलसेवकः[१०] ॥ ५ ॥
रुपैकनिष्ठ-सद्भक्तः[११] परमानन्द-विग्रहः[१२] ॥
सद्भक्तज्ञातमाहात्म्यो[१३] मोक्षाधिकसुखप्रदः[१४] ॥ ६ ॥
लोकरक्षार्थ-यागादि-सर्ववैदिक-कर्मकृत्[१५] ॥
सर्ववेदार्थविज्ञाता[१६] वेदरक्षापरायणः[१७] ॥ ७ ॥
सदा सम्प्राप्तसर्वार्थो[१८] निःस्पृहो[१९] लेपवर्जितः[२०] ॥
निर्गुणः[२१] [२२]सगुणोऽनन्तो[२३] गुणदोषविवर्जितः[२४] ॥ ८ ॥
[२५]मायावाद-तमो-भानुर्ब्रह्मवाद-सुधाकरः[२६] ॥
प्रतिपक्षपतङ्गाग्निः[२७] प्रत्यङ्गसुखदायकः[२८] ॥ ९ ॥
प्रत्यङ्गाद्भुत-सौन्दर्य-भक्तनेत्र-महोत्सवः[२९] ॥

[३०]गोपीनाथस्वरूपाप्तिकर्ताऽनुग्रहलक्षणः[३१] ॥ १० ॥
भक्तिमार्गस्थिरत्वार्थस्थिरीभूतः[३२] स्ववंशकृत्[३३] ॥
श्रीमद्गिरिधराद्यात्मप्रकटीकृततद्गुणः[३४] ॥ ११ ॥
भक्तप्रियो[३५] भक्तवश्यो[३६] भक्तदुःखासहः[३७] प्रभुः[३८] ॥
दुर्लभो[३९] भक्तसुलभो[४०] भक्तेच्छाविषयप्रदः[४१] ॥ १२ ॥
भक्तानुग्रह - मात्रार्थ - धृत - मानुषविग्रहः[४२] ॥
नानाविधमहाभोगभोगासक्तो[४३] जितेन्द्रियः[४४] ॥ १३ ॥
लोकदर्शितमर्यादो[४५] भक्तैकपुष्टिदर्शकः[४६] ॥
स्मृतमात्रमहापापहर्ता[४७] पतितपावनः[४८] ॥ १४ ॥
कमनीय-पदाम्भोज-रक्त-भक्त-मधुव्रतः[४९] ॥
प्रपन्नसदसज्जातिजनतामोचनक्षमः[५०] ॥१५ ॥
वृन्दावनप्रियो[५१] वृन्दावनलीलासदाप्रियः[५२] ॥
निकुञ्जपरमप्रेयान्[५३] पद्मबन्धुसुताप्रियः[५४] ॥ १६ ॥
तत्तीरप्रेमसंयुक्तो[५५] गोवर्द्धनगिरिप्रियः[५६] ॥
राधिकानायकः[५७] [५८]प्रेयानात्मैकप्रीतिवर्द्धनः[५९] ॥ १७ ॥
चतुःषष्टिकलाभिज्ञो[६०] रसिकैकशिरोमणिः[६१] ॥
विष्णुस्वाम्युक्तसन्मार्गसर्वसंशयनाशकः[६२] ॥ १८ ॥
सदाचार-सुधापान-रक्त-भक्ताखिलामरः[६३] ॥
सेवार्थसेवकव्याजभूलोकगतनिर्जरः[६४] ॥ १९ ॥
शिरः-श्रीकर-संस्पर्श-भवबन्ध-विमोचकः[६५] ॥
मुक्त्युत्कृष्टस्फुरद्दास्यो[६६] महाभाग्यार्पितात्मकः[६७] ॥ २० ॥
ब्रह्माद्युपरि - संराजदुररीकृत - सेवकः[६८] ॥
सर्वकर्मविनिवृत्तभक्तार्थैकप्रवृत्तिमान्[६९] ॥ २१ ॥
श्रीमद्भागवताख्यात - रत्नाकर - वगाहकृत्[७०] ॥
तद्राजन्नवनीलश्रीमहारत्नप्रकाशकः[७१] ॥ २२ ॥
शरणागतसंत्राता[७२] शरण्याङ्घ्रिसरोरुहः[७३] ॥

पादपद्मतलस्पर्शधरणीक्लेशनाशकः[७४] ।। २३ ।।
तीर्थाद्यधिक - पादाम्बु - सर्वताप - निवारकः[७५] ।।
कृतार्थीकृतपादाब्जश्रिताश्रितश्रिताखिलः[७६] ।। २४ ।।
स्वीयत्वभावनामात्र - कृतार्थीकृत - सेवकः[७७] ।।
दीनतामात्रसन्तुष्टः[७८] करुणारससागरः[७९] ।। २५ ।।
दृढविश्वासवद्दास - निज - रूप - प्रदर्शकः[८०] ।।
स्वप्राकट्यकृतोत्कृष्टदैवीसृष्टिप्रयोजनः[८१] ।। २६ ।।
आसुरांशविमोहार्थकिञ्चिल्लीलाप्रदर्शकः[८२] ।।
सर्वान्तर्गतभावज्ञः[८३] पराविज्ञातभावकः[८४] ।। २७ ।।
भावात्मा[८५] सर्वरत्यादिशृङ्गाररसभावभृत्[८६] ।।
[८७]अजातिर्द्विजवर्याग्र्यो[८८] द्विजवर्यसुमानकृत्[८९] ।। २८ ।।
द्विजराजाधिकाह्लादकारी[९०] द्विजवरेष्टभृत्[९१] ।।
अविघ्नः[९२] सर्वकल्याणः[९३] सर्वकल्याणकारणम्[९४] ।। २९ ।।
अभयो[९५] भक्तभीहर्ता[९६] भक्तापराधसक्षमः[९७] ।।
भक्तदोषहरो[९८] भक्तसर्वसद्गुणवृद्धिकृत्[९९] ।। ३० ।।
उपभुक्त-सदाभोग-मायाजित्सर्वसेवकः[१००] ।।
उपमारहितः[१०१] सर्वभुवनैकविभूषणम्[१०२] ।। ३१ ।।
भूमिलोकमहाभाग्यं[१०३] नित्यासङ्ख्येयशक्तिमान्[१०४] ।।
सर्वमाधुर्यमाधुर्यो[१०५] मनोभारत्यगोचरः[१०६] ।। ३२ ।।
चिन्तामणि-सुर-क्षोणीरुह-धेनु-यशोहरः[१०७] ।।
लोकवेदसमाख्यातपुरुषोत्तमनायकः[१०८] ।। ३३ ।।
महादेवसमाख्यातमनन्तेष्वपि नामसु ।।
अष्टोत्तरशतं नाम्नां श्रीविट्ठलेश्वरस्य यः ।। ३४ ।।
पठति प्रेमसंयुक्तः प्रत्यहं भाग्यवान्नरः ।।
राधाकान्तप्रियो भूत्वा पिबेत्तदधरामृतम् ।। ३५ ।।

।। इति श्रीविट्ठलेश्वरस्याष्टोत्तरशतनामस्तोत्रं महादेवविरचितं पूर्णम् ।।

॥ नामकल्पतरुस्तवः

(मङ्गलोपक्रमः)

यन्नामकल्पवृक्षस्तु तुङ्गाश्चर्य
गोकुलेशकृपादृष्टिवृष्ट्या संसिक्तमूलकः ॥ १ ॥

(स्तव-प्राकट्यप्रयोजन-फलसिद्धि-निरूपणम्)

श्रुति - स्मृति - पुराणादि - गुणैर्बद्धालवालकः ॥
पुष्टिभक्तिरसस्निग्धभावपुञ्जदलान्वितः ॥ २ ॥
अनुग्रहबृहच्छायो दासवृन्दनिषेवितः ॥
लावण्यपुष्पसंयुक्तः सद्योऽभीष्टफलप्रदः ॥ ३ ॥
जगत्समस्त-भक्तानामिष्ट-सिद्धिप्रदोऽभवत् ॥
तन्नामशतमेकं तु वक्ष्ये साष्टाधिकं मुदा ॥ ४ ॥
साधनान्तरहीनोऽपि तत्पदाब्जप्रसादतः ॥
फलप्राप्त्याशया नूनं कलौ कर्तुं समारभे ॥ ५ ॥

(स्तवस्य ऋषि-च्छन्दो-देवता-बीज-विनियोग-निरूपणम्)

ऋषिस्तु विष्णुदासाख्यस्तच्छायासेविताशयः ॥
नाम्नां छन्दो यत्प्रसिद्धं देवता रघुनायकः ॥ ६ ॥
बीजं सर्वसमर्थो हि देवकीनन्दनात्मजः ॥
समस्तशुभसिद्ध्यर्थे विनियोगः प्रकीर्तितः ॥ ७ ॥

(लघु-श्रीरघुनाथचरणानाम् अष्टोत्तरशतनामानि)

रघुनाथः[१] [२]कृपासिन्धुर्देवकीनन्दनात्मजः[३] ॥
चन्द्रावलीपुत्ररत्नं[४] समस्तकुलपालकः[५] ॥ ८ ॥
[६]सर्वलोकप्रियस्त्राता[७] दासवृन्दसुसेवितः[८] ॥
भूपालवाञ्छितपदः[९] सर्वदोषनिवारकः[१०] ॥ ९ ॥
पद्मावतीपतिः[११] कान्तः[१२] सर्वकोककलाधरः[१३] ॥
दासाभयप्रदाता[१४] च विप्रसम्मानकारकः[१५] ॥ १० ॥

गुणज्ञो[१६] भगवद्भक्तिमार्गरक्षणतत्परः[१७] ॥
[१८]सर्वमङ्गलरूपश्च गजेन्द्रगतिसुन्दरः[१९] ॥ ११ ॥
श्रीभागवतभावार्थज्ञापको[२०] विबुधप्रियः[२१] ॥
प्रतापी[२२] सुखदाता[२३] च दानधर्मपरायणः[२४] ॥ १२ ॥
एकपत्नीव्रतधरो[२५] वेदधर्मादिमर्मवित्[२६] ॥
कृष्णसेवासावधानो[२७] वंशनीतिनियामकः[२८] ॥ १३ ॥
मनोज्ञपङ्कजपदः[२९] कमनीयनखेन्दुधुत्[३०] ॥
[३१]ज्ञानप्रकाशकश्चैव तमोदुर्बुद्धिनाशकः[३२] ॥ १४ ॥
दारिद्र्यशोकहारी[३३] च महौदार्यमहोदधिः[३४] ॥
[३५]चन्द्रांशुवच्छुभ्रकीर्तिस्तीर्थतीर्थकरो[३६] विभुः[३७] ॥ १५ ॥
सौभाग्यभाजनं[३८] चैव व्रजमण्डलमण्डनः[३९] ॥
सङ्गीतरसभावज्ञः[४०] शृङ्गाररससारवित्[४१] ॥ १६ ॥
वर्णाश्रमादिधर्माणां रक्षकः[४२] सर्वपूजितः[४३] ॥
विप्रावतारधारी[४४] च सच्चिदानन्दविग्रहः[४५] ॥ १७ ॥
कालदोषनिराकर्ता[४६] प्रसन्नमुखपङ्कजः[४७] ॥
वादिवृन्दमदच्छेदी[४८] स्वपक्षप्रतिपालकः[४९] ॥ १८ ॥
नागरीनयनानन्दकर्ता[५०] लावण्यवारिधिः[५१] ॥
गोवर्द्धनधरासक्तिदाता[५२] गोकुलरक्षकः[५३] ॥ १९ ॥
[५४]अलौकिकगुणाब्धिश्च नरनाथविमोहनः[५५] ॥
[५६]निजदीनजनाधारो [५७]दयालुर्भक्तवत्सलः[५८] ॥ २० ॥
[५९]कमनीयस्वरूपश्च जगद्वल्लभदुर्लभः[६०] ॥
श्रुतिस्मृतिपुराणादिसर्वशास्त्रार्थपारगः[६१] ॥ २१ ॥
सर्वदा सुखरूपश्च[६२] भक्तहृत्तापनाशकः[६३] ॥
[६४]नामतुल्यगुणश्चैव पितृभक्तिविभूषितः[६५] ॥ २२ ॥
[६६]आर्यतुल्यस्वरूपश्च जगदुद्धरणक्षमः[६७] ॥
निःसाधनजनाधारः[६८] शुद्धः[६९] सद्बुद्धिदायकः[७०] ॥ २३ ॥
आजानुबाहुविस्तारः[७१] कम्बुग्रीवमनोहरः[७२] ॥
[७३]सरसीरुहनेत्रश्च लावण्यरसपूरितः[७४] ॥ २४ ॥

चारुहास्यः[७५] कटाक्षादिविनोदरससागरः[७६] ।।
कामिनीमानहारी[७७] च कोटिकन्दर्पदर्पहा[७८] ।। २५ ।।
विट्ठलेश्वरसन्तोषकर्ता[७९] चारुकवित्वकृत्[८०] ।।
प्रावृड्घनाघनश्यामः[८१] समस्तरसवृष्टिदः[८२] ।। २६ ।।
मनीषी[८३] मुख्यभूदेववन्दितः[८४] सद्विलासवान्[८५] ।।
श्रीकृष्णबाललीलादिलीलारससुपूरितः[८६] ।। २७ ।।
रसादिभावमर्मज्ञो[८७] गोवर्द्धनधरप्रियः[८८] ।।
स्वभक्तप्रियकर्ता[८९] च सर्वारिष्टनिवारकः[९०] ।। २८ ।।
श्रीमदाचार्य - पादाब्ज - प्रसाद - बलवत्तरः[९१] ।।
नानावैभवभोगाढ्यो[९२] जगतीतलतापहृत्[९३] ।। २९ ।।
पुण्यश्लोको[९४] महद्भाग्यो[९५] महत्कार्यकरोदयः[९६] ।।
[९७]सत्यवाक्सत्यसङ्कल्पो [९८] निर्दोषगुणविग्रहः[९९] ।। ३० ।।
षड्गुणैश्वर्यसम्पन्नो[१००] भवबन्धविमोचकः[१०१] ।।
सौहार्दभावसंयुक्त :[१०२] सदा सज्जनवेष्टितः[१०३] ।। ३१ ।।
[१०४]आश्चर्यितसमर्थश्च नित्यनूतनरूपवान्[१०५] ।।
पितामहादिवाक्योक्तमार्गपालनतत्परः[१०६] ।। ३२ ।।
सर्वदा सुखदाता[१०७] च कल्पवृक्षदृगञ्चलः[१०८] ।।

(स्तवपाठफलम्)

श्रीमतां रघुनाथानां नामान्येतानि नित्यशः ।। ३३ ।।
यः पठेत्प्रातरुत्थाय तस्य कृष्णः प्रियो भवेत् ।।
कामपूर्तिकरो नूनं नामकल्पतरुस्तवः ।। ३४ ।।
विष्णुदासेन दासेन सविश्वासेन वर्णितः ।।
एतद्विषयिणीं सिद्धिं प्रभुरेव करिष्यति ।। ३५ ।।
संशयोऽत्र न कर्तव्यः कदाचिद्बुद्धिमत्तमैः ।।
इत्ययं कल्पवृक्षाख्यः स्तवो गूढप्रकीर्तितः ।। ३६ ।।

।। इति श्रीमद्-देवकीनन्दनचरणकमलैकनिष्ठ-तुम्बरु-विष्णुदास-विरचितो नामकल्पतरुस्तवः समाप्तः ।।

।। यमुनास्तोत्रम् ।।

(पृथ्वी)

नमामि यमुनां हरेः प्रियतयागतां बल्लवी-
रहस्य - रसकेलि - सङ्गम - कलाकलापाञ्चिताम् ।।
व्रजे तटगत - द्विजेरित - मनोज्ञकोलाहलां
चलाङ्गुलि - तरङ्ग - सैक्त - समुद्रमुक्ताफलाम् ।। १ ।।

ययात्मपरिरब्धया निजपदाम्बुजाङ्गुष्ठमु-
न्नमय्य पिबता कृतं यदपि माननं शौरिणा ।।
तथापि पदसंयुजो विरसमुक्तसायुज्यमुद्-
विभाव्यत इति स्फुटं जयति सा हरिप्रेयसी ।। २ ।।

यदम्भसि निमज्जनात्सपदि गान्दनीनन्दनो
जनार्दनहलायुधामितमहित्वमादृष्टवान् ।।
असावमृतनिन्दिनी मधुरनीरनिःष्यन्दिनी
कलिन्दगिरिनन्दिनी स्फरतु माधवानन्दिनी ।। ३ ।।

(शार्दूलविक्रीडितम्)

कूले केलिकलाकलापकृतिना काकोदरः कालियो
यत्सम्बन्धजभाग्यतो भगवता पादाङ्कितो मोचितः ।।
लीलावञ्जुलकुञ्जमञ्जुललताटोपापि गोपाङ्गना-
रासश्रीपतिभूः प्रसीदतु मयि श्रीकृष्णतुर्यप्रिया ।। ४ ।।

(शिखरिणी)

यदम्भःपानाद्यद्विमलगुणगानात्सुकृतिनां
हरिः स्वात्मानं श्रीशतसहितमादर्शयति च ।।
पराकाष्ठा सिद्धेः शमलशमनात्तव्रतमुखा
सुखाराध्या राधा दयितदयिता सा दययतु ।। ५ ।।

(मालिनी)

मतिमतिकलिकाले मादृशानां कृशानां
स्थगयति हरिणा या स्थापिता मङ्गलाय ।।
जयति विजयलक्ष्म्या वैजयन्तीजयन्ती
दुरितदलनदीक्षाबद्धकक्षाऽर्कपुत्री ।। ६ ।।

(पृथ्वी)

विनीलतनुतोऽमृतप्रसरतोऽथ गाभीर्यतोऽ-
प्यनेककलिकल्मषक्षपणतोऽपि प्रासर्यतः ।।
जनार्दनसधर्मिणी भवति सा मनोहारिणी
रसोदधितरङ्गिणी तरणिनन्दिनी दिव्यतु ।। ७ ।।

(शार्दूलविक्रीडितम्)

वृन्दारण्यवरेण्यमाथुरभुवि श्रीगोकुलेशं कुले
गुञ्जन्मत्तमधुव्रतव्रततिभिर्दष्टापि हृष्टात्मभिः ।।
या संस्मारयती जनार्दनमनुध्यानेन किं वा पुनः
सा देवी शमनस्वसा स्वयमसावास्तां मम प्रेयसे ।। ८ ।।

(वंशस्थम्)

निगूढगोपीजनवल्लभप्रिया-
स्वरूप - माहात्म्य - निरूपणेन ।।
स्तोत्रेण श्रीवल्लभपादपद्म-
मधुव्रतोक्तेन हरिः प्रसीदतु ।। ९ ।।

।। इति श्रीवल्लभमतानुवर्तिश्रीनाथभट्टकृतं यमुनास्तोत्रं सम्पूर्णम् ।।

।। श्रीयज्ञवाराहस्तोत्रम् ।।

(मालिनी)

जयति विजयमूर्तिर्यज्ञवाराहनामा
भवभयमपहन्तुं माथुरे मण्डलेऽपि ।।
हरिरिपुदशशीर्षद्वेषिरामप्रसादाल्-
लवणलवननाम्ना सम्प्रतिष्ठापितो यः ।। १ ।।

तमहमिह कदाचिद्द्रष्टुमारादुदारा-
शयशयमभियातः प्रार्थनासार्थनाथः ।।
तदनु तदनुकम्पादृष्टिपीयूषवृष्ट्या
भवदवदहनस्थोऽप्यस्तुवं स्नापितोऽन्तः ।। २ ।।

(उपजातिः)

तथा हि या हि स्वकृताकृताऽभूत्
स्तायिस्वसृष्टिर्विधिना निराशयात् ।।
तस्यामशेषाश्रयकारणत्वं
प्रदर्शयन् सूकरमूर्तिरासीः ।। ३ ।।

हिरण्यरेतस्यपतद्वरेण्य-
हिरण्यचक्षुः पतगस्त्वदोजसि ।।
तदा यदारण्यहिरण्यगर्भा
पदा समूदार मुदा हृदाविः ।। ४ ।।

श्रीकान्त मत्स्वान्तपतङ्गमग्ने-
रङ्गारगर्वद्विषति स्वतेजसि ।।
पतन्तमङ्गीकुरु सन्तमङ्गे
प्रादुर्भवन् भो भगवन् भवाब्धौ ।। ५ ।।

विश्वम्भरामम्भसि मग्नभूतां
विश्वम्भराविश्वसदासुरारे ।।

यथोद्दधर्थाशु तथैव विश्व-

जनीन मामुद्धर दीनबन्धो ॥ ६ ॥

अद्यापि भो देव वराहरागमे

वराह राजस्युदितो विधातुः ॥

तथापि चेदङ्घ्रिजुषं न मादृशं

बिभर्षि तर्ह्यच्युत विच्युतो व्रतात् ॥ ७ ॥

एकस्य मे पातकतापितस्य

पितः स्वदौघे पतितस्य तस्य ॥

भवाम्बुधौ देव भवाम्बुशायिन्

नवाम्बुदश्यामलकर्णधारः ॥ ८ ॥

विश्वं प्रहृष्टं त्वयि सम्प्रहृष्टेऽ-

भीष्टे भुवः कोलविलोलदृष्टे ॥

हिरण्यदृष्टेर्द्विषति स्म दृष्टेर्-

लब्धिर्विमृष्टे हृदि कामवृष्टेः ॥ ९ ॥

ॐ नमः श्रीवराहाय भूशक्तिसहिताय च वेददैवद्रव्यदेशकालमन्त्रयज्ञात्मने नमः ॥

॥ इति श्रीवल्लभमतानुवर्तिश्रीनाथभट्टकृतं श्रीयज्ञवराहस्तोत्रं समाप्तम् ॥

(श्रीछत्रबन्धः)



गो कु ले श स्तु मा पा तु गो व र्ध न ध रो व तु।
श्री श न म्र म ते त्वां तु श्री स्तु ध र्म र ता व तु।।

शुद्धाद्वैतमत-परमाचार्य-श्रीगोकुलनाथ-महाराजेभ्यः केनचित् विदुषा समर्पितः।

(श्रीकमलबन्धः)



या च गो कु ल ले शा या या शा ले शो ध रा ज या।
या ज रा ज म ते मे या या मे ते श्री श गो च या।।

शुद्धाद्वैतमत-परमाचार्य-श्रीगोकुलनाथ-महाराजेभ्यः केनचित् विदुषा समर्पितः।

अस्माकं संस्कृत-प्रकाशनानि

१. श्रीमन्महाप्रभूणां जन्मपत्रिका

२. महानुभावसद्रत्नमालिका (श्रीजीवनजी-महाराज-विरचिता)

३. शिक्षामुक्तावली (श्रीजीवनजी-महाराज-विरचिता)

४. श्रीमत्प्रभुचरणानां जन्मपत्रिका

५. श्रीकृष्णचन्द्राष्टकम् (श्रीकेवलराम-विरचितम्)

६. अग्निहोत्रप्रयोगः (आपस्तम्बीयः)

७. विश्वप्रकाशानुक्रमणिका (विश्वप्रकाशग्रन्थान्तर्गता श्रीविश्वनाथेन विरचिता)